स्तम्भ पूजनम्

1. मण्डपमध्ये ईशानकोणे रक्तवर्णे स्तम्भे ब्रह्माणम् पूजयेत् —

ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचो वेनऽआवः । सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्चविवः ॥ ब्रह्मणे नमः । सावित्र्यै नमः । वास्तुदेवतायै नमः । ब्राह्म्यै नमः । गंगायै नमः । स्तम्भशिरसि नागमात्रे नमः । स्तम्भं आलभेत् - ऊर्ध्व ऊषुण ऊतये तिष्ठा देवो न सविता । ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ।

शाखाबन्धनानि पूजयेत् - यतो यतः समीहसे - - - - - - - - - - |

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ब्रह्मणे नमः ।

हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन ब्रह्माद्यावाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ॥

2. आग्नेयकोणे कृष्णवर्णे स्तम्भे विष्णुं पूजयेत् -
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
। समूढमस्य पांसुरे स्वाहा।
विष्णवे नमः । लक्ष्म्यै नमः । आदित्यायै नमः ।
वैष्णव्यै नमः । वसुदायै नमः । स्तम्भशिरसि
नागमात्रे नमः । स्तम्भं आलभेत् - ऊर्ध्व ऊषुण
ऊतये ____ । शाखाबन्धनानि पूजयेत् - यतो
यतः समीहसे ________ ।
सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि विष्णवे
नमः ।
हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन विष्णवाद्यावाहित
स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ॥

3. नैर्ऋत्यकोणे श्वेतवर्ण स्तम्भे शंकरं पूजयेत् —

ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः। बाहुभ्यामुत ते नमः ॥

शिवाय नमः। गौर्यै नमः। माहेश्वर्यै नमः। शोभनायै नमः। भद्रायै नमः। स्तम्भशिरसि नागमात्रे नमः। स्तम्भं आलभेत् - ऊर्ध्व ऊ षुण ऊतये - ———। शाखाबन्धनानि पूजयेत् - यतो यतः समीहसे - ———।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि रुद्राय नमः।

हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन रुद्राद्यावाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ॥

4. वायव्यकोणे पीतवर्ण स्तम्भे इन्द्रं पूजयेत् -

ॐ त्रातारमिन्द्र मवितारमिन्द्र ७ हवेहवे सुहव ७ शूरमिन्द्रम् ।। ह्वयामि शक्रम्पुरुहूतमिन्द्र ७ स्वस्तिनो मघवा धात्विन्द्रः ।।

इन्द्राय नमः ।इन्द्राण्यै नमः । आनन्दायै नमः । विभूत्यै नमः ।आदित्यै नमः । स्तम्भ शिरसि नागमात्रे नमः । स्तम्भं आलभेत् — ऊर्ध्व ऊर्ध्व ऊतये — — — — — — — । शाखा बन्धनानि पूजयेत् - यतो यतः समीहसे — — — — । सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि इन्द्राय नमः । हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन इन्द्राद्यावाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ।।

5. मण्डपात् बहिर्गत्वा ईशानकोणे रक्तवर्णस्तम्भे सूर्यं पूजयेत् —

ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

सूर्याय नमः । सौर्य्यै नमः । भूत्यै नमः । सावित्र्यै नमः । मंगलायै नमः । स्तम्भशिरसि नागमात्रे नमः । स्तम्भं आलभेत् – उर्ध्व अधुण - ------------ । शाखाबन्धनानि पूजयेत् – यतो यतः समीहसे ----------- ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि सूर्याय नमः ।

हस्ते जलं गृहीत्वा – अनेन कृतार्चनेन सूर्याद्यावाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम॥

Page No. ______
Date ______

6. ईशानपूर्वयोर्मध्ये श्वेतवर्ण स्तम्भे गणेशं पूजयेत् -

ॐ गणानां त्वा गणपति ग्वँ हवामहे प्रियाणान्त्वा प्रियपति ग्वँ हवामहे निधीनान्त्वा निधिपति ग्वँ हवामहे वसोमम । आहमजानि गर्भधमात्त्वमजासि गर्भधम ॥

गणपतये नमः । सरस्वत्यै नमः । विघ्नहर्त्र्यै नमः । जयायै नमः । स्तम्भशिरसि नागमात्रे नमः । स्तम्भं आलभेत् - उर्ध्व ऊषुण ------ ।

शाखाबन्धनानि पूजयेत् - यतो यतः ------------ ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि । गणेशाय नमः ।

हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन गणेशाद्यावाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ।

7. पूर्वाग्नयोर्मध्ये कृष्णवर्णस्तम्भे यमं पूजयेत् —

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ।
यमाय नमः । सन्ध्यायै नमः । आअन्यै नमः ।
क्रूरायै नमः । नियन्त्र्यै नमः । स्तम्भशिरसि नागमात्रे नमः । स्तम्भं आलभेत - उर्ध्व ऊषुण ऊतये - - - । शाखाबन्धनानि पूजयेत - यतो यतः समीहसे - - - - - - - - - - - - - - - - - - - |
सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि यमाय नमः ।
हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन यमाद्यावाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ।

8. आग्नेय कोणे कृष्णवर्णस्तम्भे नागराजं पूजयेत् —

ॐ नमोऽस्तु सर्प्पेभ्यो ये के च पृथिवीमनु । ये ऽ अन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ।

नागराजाय नमः । मच्छमसून्मायै नमः । धरायै नमः । महापद्मायै नमः । स्तम्भ-शिरसि नागमात्रे नमः । स्तम्भं आलभेत् - उर्ध्व ऊषुण ऊतये - —— । शाखा बन्धनानि पूजयेत् — यतो यतः समीहसे —— ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नागराजाय नमः ।

हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन नागराजाद्यावहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ।

Page No.
Date

9. अग्नि दक्षिण योर्मध्ये श्वेतवर्णस्तम्भे स्कन्दं पूजयेत् –

ॐ यदक्रन्दः प्रथमं जायमानऽउद्यन्त्समुद्रा दुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महिजातं तेऽअर्वन् ।
षण्मुखाय नमः । पश्चिमसन्ध्यायै नमः । जयायै नमः । शक्तये नमः । स्तम्भशिरसि नागमात्रे नमः । स्तम्भं आलभेत् – ऊर्जं अपुण ———— । शाखाबन्धनानि पूजयेत् –
यतो यतः समीहसे ———— ।
सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि स्कन्दाय नमः ।
हस्ते जलं गृहीत्वा – अनेन कृतार्चनेन स्कन्दाद्यावाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ।

10. दक्षिण नैर्ऋत्ययोर्मध्ये धूम्रवर्णस्तम्भे वायुम् पूजयेत् —

ॐ वायो ये ते सहस्रिणो रथासस्तेभिरागहि नियुत्वान्सोमपीतये ।

वायवे नमः । गायत्र्यै नमः । मध्यमसन्ध्यायै नमः । स्तम्भशिरसि नागमात्रे नमः ।

स्तम्भं आलभेत् — ऊर्ध्व ऊषुण ऊतये ———।

शाखा बन्धनानि पूजयेत् — यतो यतः ———।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि वायवे नमः ।

हस्ते जलं गृहीत्वा — अनेन कृतार्चनेन वायवाद्या वाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ।

11. नैर्ऋत्य कोणे पीतवर्णस्तम्भे सोमं पूजयेत् --

ॐ आप्यायस्व समेतु ते विश्वतः सोम
वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥

सोमाय नमः। सावित्र्यै नमः । अमृतकलायै नमः ।
पश्चिमसन्ध्यायै नमः । स्तम्भशिरसि
नागमात्रे नमः ।

स्तम्भं आलभेत् — ऊर्ध्व ऊ षु ण ऊतये - -
- - - - ।

शाखा बन्धनानि पूजयेत् — यतो यतः - - - - -
- - - - ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि सोमाय
नमः ।

हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन सोमाद्यावा
हित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम।

12. ततो वेदी पालिका योगिनी क्षेत्रपालान्तं वरुणं पूजयेत

ॐ इमं मे वरुणश्रुधी हवमद्या च मृडय त्वामवस्युराचके । वरुणाय नमः । वारुण्यै नमः । पाशधारिण्यै नमः । बृहत्यै नमः । स्तम्भशिरसि नागमात्रे नमः ।

स्तम्भं आलभेत - ऊर्ध्व ऊषुण ऊतये - - - - ।

शाखाबन्धनानि पूजयेत - यतो यतः - - - - - - ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि वरुणाय नमः ।

हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन वरुणाद्यावाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ।

13. पश्चिमद्वारसव्यान्तराले नैऋत्यस्तम्भे अष्टवसून् पूजयेत् —

ॐ वसुभ्यस्त्वा रुद्रेभ्यस्त्वा दित्येभ्यस्त्वा सञ्जानाथां द्यावा पृथिवी मित्रावरुणौ त्वा वृष्ट्यावताम् । व्यन्तु वयोक्तꣳ रिहाणा मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह । चक्षुष्पा ऽअग्नेऽसि चक्षुर्मे पाहि ।

अष्टवसुभ्यो नमः । विनतायै नमः । अणिमायै नमः । भूत्यै नमः । गरिमायै नमः ।

स्तम्भशिरसि नागमात्रे नमः ।

स्तम्भं आलभेत् — ऊर्ध्व ऊषुण - ———— - - - - ।

शाखाबन्धनानि पूजयेत् — यतो यतः - ———— ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि

अष्टवसुभ्यो नमः ।

हस्ते जलं गृहीत्वा - अनेन कृतार्चनेन अष्टवसवाद्यावाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ।

14. वायव्यां सोमो पीतवर्णे स्तम्भे चनदं (कुबेर) पूजयेत् –

ॐ सोमो धेनु ꣳ सोमो ऽअर्व्वन्तमाशु ꣳ सोमो व्वीरं कर्म्मण्यं ददाति । सादन्यं विदत्थ्य ꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥

चनदाय नमः । आदित्यायै नमः । लघिमायै नमः । सिनीवाल्यै नमः । स्तम्भशिरसि नागमत्रे नमः ।

स्तम्भं आलभेत् – ऊर्ध्व ऊषुण ऊतये – – – – – – – – – – ।

शाखाबन्धनानि पूजयेत् – यतो यत : – – – – – – – – – – ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि चनदाय नमः ।

हस्ते जलं गृहीत्वा – अनेन कृतार्चनेन चनदाद्यावाहित स्तम्भाधिष्ठात् देवता: प्रीयन्ताम् न मम ।

15. उत्तर वायव्यां योरन्ताराले पीतवर्णस्तम्भे बृहस्पतिं पूजयेत —

ॐ बृहस्पते ऽअति यदर्य्यो ऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।

बृहस्पतये नमः । पौर्णमास्यै नमः । सावित्र्यै नमः । स्तम्भशिरसि नागमात्रे नमः ।

स्तम्भं आलभेत — ऊर्जं ऋषुण ऊतये — — — — — — ।

शाखाबन्धनानि पूजयेत — यतो यतः — — — — — — ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि बृहस्पतये नमः ।

हस्ते जलं गृहीत्वा — अनेन कृतार्चनेन बृहस्पत्याद्यावाहित स्तम्भाधिष्ठात् देवता : प्रीयन्ताम् न मम ।

16. उत्तर ईशान यो र्मध्ये स्तम्भे स्तम्भे
विश्वकर्माणं पूजयेत् —

ॐ विश्वकर्म्मन् हविषा वर्द्धनेन त्रातारमिन्द्र मकृणोरवध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥

विश्वकर्मणे नमः । सिनीवाल्यै नमः । सावित्र्यै नमः । वास्तुपुरुषाय नमः । स्तम्भशिरसि नागमात्रे नमः ।

स्तम्भं आलभेत् – ऊर्ध्व ऊ षुण ————— ।

शाखाबन्धनानि पूजयेत् – यतो यतः ————— ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि विश्वकर्मणे नमः ।

हस्ते जलं गृहीत्वा — अनेन कृतार्चनेन विश्वकर्माद्या वाहित स्तम्भाधिष्ठातृ देवताः प्रीयन्ताम् न मम ।

ततः यज्ञभूमिं पूजयेत —

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥

विश्वधाराऽसि धरणी शेषनागोपरि स्थिता । उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि यज्ञभूम्यै नमः । भारतभूम्यै नमः । भगवत्यै धरित्र्यै नमः ।

पुष्पांजली — नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज । ॐ नृसिंह उग्ररूप ज्वल ज्वल प्रज्वल प्रज्वल स्वाहा ।

(पुष्पांजलिं मण्डप भूमौ विकिरेत्)

ॐ नमः शिवाय अष्टवारं जपेयुः ।

सतोरण द्वारपाल दिक्पाल पूजन

1. पूर्व तोरण द्वारपाल दिक्पाल पूजन

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ।

ॐ भूर्भुवः स्वः ऋग्वेदाधिष्ठिताय रुद्र तोरणाय नमः । सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि ।

दक्षिणशाखायाम् – राहवे नमः । वामशाखायाम् – बृहस्पतये नमः ।
दक्षिण कलशोपरि – प्रशान्ताय नमः । वामकलशोपरि – शिशिराय नमः ।
द्वारकलशयोः – गंगायै नमः । यमुनायै नमः ।
द्वारशाखयोः – गणेशाय नमः । स्कन्दाय नमः ।
द्वारशाखयोः शाखाधिष्ठातृ देवताभ्यो नमः ।
द्वार कलशयोः कलशाधिष्ठातृ देवताभ्यो नमः ।
ऊर्ध्वं द्वारश्रियै नमः । अधः देहल्यै नमः ।

ततः मध्य कलशोपरि इन्द्रं पूजयेत् – ॐ त्रातारमिन्द्र मवितारमिन्द्र ᳪ हवेहवे सुहव ᳪ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ᳪ स्वस्ति नो मघवा धात्विन्द्रः ॥

इन्द्राय नमः । ऐरावताय नमः । वज्राय नमः । हेतुकाराय नमः । क्षेत्रपालाय नमः । उपरि ध्वजपताकाभ्यां नमः ॥
सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि ॥

बलिदान – इन्द्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं समर्पयामि ।

भो इन्द्र ! दिशं रक्ष बलिं भक्ष अस्माकं सर्वेषां यजमानसहायिनाम् (समस्त) भारतवासीनाम् तथा च ब्राह्मणानां गृहे आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ।

अनेन बलिदानेन इन्द्रः प्रीयताम् न मम ।

२. अग्निकोणे कलशोपरि अग्नि पूजयेत -

ॐ त्वन्नो अग्ने तव देवपायुभिर्म्मघोनो रक्ष
तन्वश्च वन्द्य । त्राता तोकस्य तनये गवामस्य
निमेष ए रक्षमाणस्तव व्रते ।
पुण्डरीकाय नमः । अमृताय नमः ।
ॐ भूर्भुवः स्वः अग्नये नमः । अग्निं आवाहयामि
स्थापयामि पूजयामि ।
सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि॥
उपरि ध्वजपताकाभ्यां नमः ।
बलिदानं - अग्नये सांगाय सपरिवाराय
सायुधाय सशक्तिकाय सवाहनाय अमुं
बलिं समर्पयामि ।
भो अग्ने । त्वं दिशं रक्ष बलिं भक्ष अत्र स्थानां
सर्वेषां मम सकुटुम्बस्य समस्त भारतवासीनाम्
तथा च सपरिवारस्य यजमानस्य आयुः कर्ता क्षेमकर्ता
शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ।
अनेन बलिदानेन अग्निः प्रीयताम् न मम ।

३. दक्षिणे तोरण द्वारपाल दिक्पाल पूजनं -

ॐ इषे त्वोर्ज्जे त्वा वायवस्थ देवो वः सविता प्रार्प्पयतु श्रेष्ठतमाय कर्म्मण आप्यायध्वमघ्न्या इन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माघशꣳसो ध्रुवाऽअस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि।

ॐ भूर्भुवः स्वः यजुर्वेदाधिष्ठिताय विकट तोरणाय नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

दक्षिणशाखायाम् - सूर्याय नमः। वामशाखायाम् - भौमाय नमः।

दक्षिण कलशोपरि - पर्जन्याय नमः। वामकलशोपरि - अशोकाय नमः।

द्वारकलशयो: - गोदावर्यै नमः। कृष्णायै नमः।

द्वारशाखायो: - पुष्पदन्ताय नमः। कपर्दिने नमः।

द्वारशाखायो: शाखाधिष्ठातृ देवताभ्यो नमः। द्वारकलशयो: कलशाधिष्ठातृ देवताभ्यो नमः। ऊर्ध्व द्वारश्रियै नमः। अधः देहल्यै नमः।

ततः मध्यकलशोपरि यमं पूजयेत — यमाय त्वाङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे।

यमाय नमः। पाशाय नमः। वामनाख्य दिग्गजाय नमः।

सूर्य पूषाभ्यां नमः। मित्राय नमः। उपरि ध्वजपताकाभ्यां नमः। सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि।

बलिदान - यमाय सांगाय सपरिवाराय सायुधाय स शक्तिकाय सवाहनाय अमुं बलिं समर्पयामि। भो यम! त्वां दिशं रक्ष बलिं भक्ष अस्य यजमानस्य सर्वेषां यज्ञ सहायिकानां समस्त भारतवासीनाम् तथा च समस्त ब्राह्मणानां गृहे आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन यमः प्रीयताम् न मम।

11. नैर्ऋत्यकोणे कलशोपरि निर्ऋतेः पूजनम् —

ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि
तस्करस्य । अन्यमस्मदिच्छ सा त इत्या
नमो देवि निर्ऋते तुभ्यमस्तु ॥

कुमुदाय नमः । दुर्जयाय नमः ।

ॐ भूर्भुवः स्वः निर्ऋतये नमः । निर्ऋतिं आवाहयामि
स्थापयामि पूजयामि ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि ॥

उपरि ध्वजपताकाभ्यां नमः ।

बलिदानं — निर्ऋतये सांगाय सपरिवाराय
सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं
समर्पयामि ।

भो निर्ऋते ! त्वं दिशं रक्ष बलिं भक्ष अत्र स्थापितां
सर्वेषां यजमान सह परिवार समस्त भारतवासीनां तथा
च सकल [illegible] आयुःकर्ता क्षेमकर्ता
शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ।

अनेन बलिदानेन निर्ऋतिः प्रीयताम् न मम ।

5. पश्चिमे तोरण द्वारपाल दिक्पाल पूजनं

ॐ अग्न आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि॥

ॐ भूर्भुवः स्वः सामवेदाधिष्ठिताय सुकर्म तोरणाय नमः। सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

दक्षिणशाखायाम् - शुक्राय नमः। वामशाखायाम् - बुधाय नमः।

दक्षिणकलशोपरि - भूतसंजीवनाय नमः। वामकलशोपरि - अमृताय नमः।

द्वारकलशयोः - रेवायै नमः। ताप्त्यै नमः।

द्वारशाखयोः - नन्दिन्यै नमः। चण्डायै नमः।

द्वारशाखयोः शाखाधिष्ठातृ देवताभ्यो नमः। द्वारकलशयोः कलशाधिष्ठातृ देवताभ्यो नमः। ऊर्ध्वं द्वारश्रियै नमः। अधः देहल्यै नमः।

ततः मध्य कलशोपरि वरुणं पूजयेत — तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणे हबोध्युरुशंस मा न आयुः प्रमोषीः॥

वरुणाय नमः। पाशाय नमः। अनन्ताख्य दिग्गजाय नमः। अंजनाय नमः। उपरि ध्वज पताकाभ्यां नमः।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि।

बलिदान — वरुणाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं समर्पयामि।

भो वरुण! स्वां दिशं रक्ष बलिं भक्ष अत्रस्मानां सर्वेषां यजमानां सपरिवाराणां समस्त भारतवासी नाम् तथा च समस्त ब्राह्मणानां गेहे आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन वरुणः प्रीयताम् न मम।

6. वायव्यकोणे कलशोपरि वायुं पूजयेत्

ॐ आ नो नियुद्भि: शतिनीभिरध्वर ७७ सहस्रिणी भिरुपयाहि यज्ञम् । वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभि: सदा न: ॥

पुष्पदन्ताय नम: । सिद्धार्थाय नम: ।

ॐ भूर्भुव: स्व: वायवे नम: । वायुम् आवाहयामि स्थापयामि पूजयामि ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि । उपरि ध्वजपताकाभ्यां नम: ।

बलिदान – वायवे सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं समर्पयामि ।

भो वायु ! त्वां दिशों रक्ष बलिं भक्ष अत्रस्थानां सर्वेषां [illegible] [illegible] समस्त भारतवासीनाम् तथा [illegible] ब्राह्मणानां च [illegible] आयु: कर्ता क्षेमकर्ता शान्ति कर्ता पुष्टि कर्ता तुष्टि कर्ता वरदो भव ।

अनेन बलिदानेन वायु: प्रीयताम् न मम ।

7- उत्तरे तोरण द्वारपाल दिक्पाल पूजनम्

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंय्यो रभि स्रवन्तु नः ॥

ॐ भूर्भुवः स्वः अथर्ववेदाधिष्ठिताय उत्तरतोरणाय नमः । सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ।

दक्षिणशाखायाम - सोमाय नमः । वामशाखायाम् - केतुशालिभ्यां नमः

दक्षिणकलशोपरि - चन्दाय नमः । वामकलशोपरि - श्रीप्रदाय नमः

द्वारकलशयोः — वाण्यै नमः । वेण्यै नमः ।

द्वार शाखयोः — महाकालाय नमः । भृङ्गिणे नमः ।

द्वारशाखयोः शाखाधिष्ठातृ देवताभ्यो नमः । द्वार कलशयोः कलशाधिष्ठातृ देवताभ्यो नमः । ऊर्ध्वं द्वारश्रियै नमः । अधः देहल्यै नमः ।

ततः मध्यकलशोपरि सोमं पूजयेत् — वयं सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ।

सोमाय नमः । सार्वभौमाय नमः । उपरि ध्वजपताकाभ्यां नमः ।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि ।

बलिदान — सोमाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय इमं बलिं समर्पयामि ।

ॐ सोम ! स्वां दिशं रक्ष बलिं भक्ष अत्रस्थानां सर्वेषां यज्ञ स्वामिकानां समस्त भारतवासीनाम तथोच्च समस्त प्राणिनां गृहे आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ।

अनेन बलिदानेन सोमः प्रीयताम् न मम ।

प्र. ईशानकोणे कलशोपरि ईशानं पूजयेत् –

ॐ तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये।

सुप्रतीकाय नमः। मंगलाय नमः।

ॐ भूर्भुवः स्वः ईशानाय नमः। ईशानम् आवाहयामि स्थापयामि पूजयामि।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि। उपरि ध्वज पताकाभ्यां नमः।

बलिदानम् – ईशानाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं समर्पयामि।

भो ईशान! स्वां दिशं रक्ष बलिं भक्ष अत्रस्थानां सर्वेषां मम यजमानानां समस्त भारतवासीनाम् तथा च समस्त ब्राह्मणानां च आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन ईशानः प्रीयताम् न मम।

१. ईशानपूर्वयोर्मध्ये कलशोपरि ब्रह्माणं पूजयेत्

ॐ आ स्तो रूरा गोहना पर्वताषो ब्रह्त्वे अरहुतौ सजोषाः। यः शाहवते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः।

ॐ भूर्भुवः स्वः ब्रह्मणे नमः। ब्रह्माणम् आवाहयामि स्थापयामि पूजयामि।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि।

उपरि ध्वजपताकाभ्यां नमः।

बलिदानम् – ब्रह्मणे सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं समर्पयामि।

ॐ ब्रह्मन् त्वं दिशो रक्ष बलिं भक्ष अतस्थानां सर्वेषां ग्राम(?) महामिकानां समस्त आरतवासीनाम् तथा च ग्रामस्थ ब्राह्मणानां गृहे आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव।

अनेन बलिदानेन ब्रह्मा प्रीयताम् न मम।

10. नैऋत्य पश्चिम योर्मध्ये कलशोपरि अनन्तं पूजयेत —

ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी यच्छानः शर्म्म सप्रथाः ॥

ॐ भूर्भुवः स्वः अनन्ताय नमः। अनन्तम् आवाहयामि स्थापयामि पूजयामि।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि। उपरि ध्वजपताकाभ्यां नमः।

बलि दानम् — अनन्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय अमुं बलिं समर्पयामि।

भो अनन्त ! [illegible] दिशं रक्ष बलिं भक्ष अत्रस्थानां सर्वेषां मम [illegible] समस्त भारतवासीनां तथाच समस्त [illegible] आयुः कर्ता [illegible] शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता च वरदो भव।

अनेन बलिदानेन अनन्तः प्रीयताम् न मम।

[illegible] —

ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढ़ानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।

ॐ सर्वेभ्यो देवेभ्यो नमः ।

वंशे — किन्नरेभ्यो नमः । पन्नगेभ्यो नमः ।

चतुर्दश स्थावरेभ्यो नमः । सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि नमस्करोमि ।

[illegible]

[illegible] समर्पयामि ॥

[illegible]

[illegible]

[illegible]

[illegible] सदाशिवा ।

[illegible]

[illegible] ॥

अनेन सार्वभौतिक बलिदानेन सार्वभौतिकाधिपति रुद्रः प्रीयताम् न मम ।

[illegible]

Page No.
Date

ध्वजा पताका निवेशनम्

1 पूर्व - इन्द्र - पीला {त्रिकोण - 1, चतुष्कोण - 1}
2 अग्नि - अग्नि - लाल
3 दक्षिण - यम - काला
4 नैऋत्य - निर्ऋति - नीला
5 पश्चिम - वरुण - सफेद
6 वायव्य - वायु - हरा
7 उत्तर - सोम - हरा
8 ईशान - ईशान - सफेद
9 ईशानपूर्वयोर्मध्ये - ब्रह्मा - लाल
10 नैऋत्यपश्चिमयोर्मध्ये - अनन्त - पीला

	त्रिकोण	चतुष्कोण
लाल -	2	2
पीला -	2	2
काला -	1	1
सफेद -	2	2
हरा -	2	2
नीला -	1	1
	10	10

Date

शंखपूजन – अग्नि ऋषि : पवमान : पाञ्चजन्य:
पुरोहित: तमीमहे महागयम्। उपयाम गृहीतो-
स्यग्नयेत्वा वर्चसऽएष ते योनिरग्नयेत्वा वर्चसे॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृत: करे। नमित:
सर्व देवैश्च पांचजन्य नमोऽस्तुते॥
पांचजन्याय विद्महे पवमानाय धीमहि। तन्नोशंख:
प्रचोदयात्।

शंखस्थ देवताभ्यो नम:। सर्वोपचारार्थे गन्धाक्षत पुष्पाणि
समर्पयामि।

घण्टापूजनम् – सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरो
गायत्रञ्चक्षु बृहद्रथन्तरे पक्षौ। स्तोमऽआत्मा छन्दाᳪं
स्यङ्गानि यजूᳪंषि नाम। साम ते तनूर्वामदेव्यं
यज्ञायज्ञियम्पुच्छन्धिष्ण्या: शफा:। सुपर्णोऽसि
गरुत्मान्दिवङ्गच्छ स्व: पत॥

आगमनार्थं तु देवानां गमनार्थं तु राक्षसाम्।
घण्टानादम् प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत्॥

घण्टास्थाय ~~गरुडाय~~ गरुडाय नम:। सर्वोपचारार्थे गन्धाक्षत
पुष्पाणि समर्पयामि।

— चतुःषष्टि योगिनी स्तोत्र मंत्र —

आवाहयाम्यहम् देवी योगिनी परमेश्वरीम् ।
योगाभ्यासेन संतुष्टा परध्यान समन्विता ॥
दिव्य कुंडल संकाशा दिव्य ज्वाला त्रिलोचना ।
मूर्तिमती ह्यमूर्ता च उग्रा चैवोग्ररूपिनी ॥
अनेकभाव संयुक्ता संसारार्णव तारिणी ।
यज्ञे कुर्वन्तु निर्विघ्नं श्रेया यच्छन्तु मातरः ॥
दिव्य योगी महायोगी सिद्ध योगी गणेश्वरी ।
प्रेताशी डाकिनी काली कालरात्री निशाचरी ॥
हुंकारी सिद्धवेताली खर्परी भूतगामिनी ।
ऊर्ध्व केशी विरूपाक्षी शुष्कांगी मासभोजिनी ॥
फूत्कारी वीरभद्राक्षी धूम्राक्षी कलहप्रिया ।
रक्ता च घोररक्ताक्षी विरूपाक्षी भयंकरी ॥
चौरिका मारिका चंडी वाराही मुंडधारिणी ।
भैरवी चक्रिणी क्रोधा दुर्मुखी प्रेतवासिनी ॥
कलाक्षी मोहिनी चक्री कंकाली भुवनेश्वरी ।
कुंडला तालकुमारी यमदूती करालिनी ॥
कौशिकी यक्षिणी यक्षी कौमारी यंत्रवाहिनी ।
दुर्घटे विकटे घोरे कम्पाले विष लंघने ॥
चतुःषष्टि समाख्याता योगिन्यो हि वरप्रदा ।
त्रैलोक्य पूजिता: नित्यं देवमानुष योगिभि: ॥

—चतु:षष्टि योगिनी प्रार्थना —

याषां रोष-प्रचण्डपावकसमो वित्तं कुलध्वंशिनः।
दौर्भाग्यं भवतीति वक्रदृष्ट्या दुःखार्णवाडम्बरः॥
तुष्यन्त्वति योगिनि विघ्नात् तनया कालीप्रिया संयुता।
कल्याणानि प्रदाभवन्तु सर्वा सिद्धिं सुखं क्रच्छताम्॥

— क्षेत्रपाल प्रार्थना —

जलद पटलनीलं दीप्यमानोग्रकेशं,
त्रिशिख डमरूहस्तं चन्द्रलेखावतंसं !
विमल वृष निरूढं चित्रशार्दूलवासः,
विजयमनिशमीडे विक्रमोद्दण्डचण्डम् ।
सबल बल विघातं क्षेपालैक पालम्,
निकट कटि करालं ह्यट्टहासं विशालम् !
करगतकरबालं नागयज्ञोपवीतं,
भज जन शिवरूपं भैरवं भूतनाथम् ॥
यं यं यक्षरूपं दशदिशिवदनं भूमिकम्पायमानं ।
सं सं सं संहारमूर्तिं शुभ मुकुट जटाशेखरं चन्द्रबिम्बम् ।
दं दं दं दीर्घकायं विकृतनखमुखं चोर्ध्वरोयं करालम् ।
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालं ॥